श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवामनपुराणे

# ॥ श्री दधिवामनस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दधिवामनस्तोत्रम् ॥

हेमाद्रिशिखराकारं शुद्धस्फटिकसन्निभम्।
पूर्णचन्द्रनिभं देवं द्विभुजं वामनं स्मरेत्॥ 1 ॥

पद्मासनस्थं देवेशं चन्द्रमण्डलमध्यगम्।
ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम्॥ 2 ॥

सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
चन्द्रमण्डलमध्यस्थं विष्णुमच्युतमव्ययम्॥ 3 ॥

श्रीवत्सकौस्तुभोरस्कं दिव्यरत्नविभूषितम्।
पीताम्बरमुदाराङ्गं वनमालाविभूषितम्॥ 4 ॥

सुन्दरं पुण्डरीकाक्षं किरीटेन विराजितम्।
षोडशस्त्रीपरिवृतमप्सरोगणसेवितम्॥ 5 ॥

ऋग्यजुःसामाथर्वाद्यैः गीयमानं जनार्दनम्।
चतुर्मुखाद्यैर्देवेशैः स्तोत्राराधनतत्परैः॥ 6 ॥

सनकाद्यैर्मुनिगणैः स्तूयमानमहर्निशम्।
त्रियम्बको महादेवो नृत्यते यस्य सन्निधौ॥ 7 ॥

दधिमिश्रान्नकवलं रुक्मपात्रं च दक्षिणे।
करे तु चिन्तयेद्वामे पीयूषममलं सुधीः॥ 8 ॥

साधकानां प्रयच्छन्तमन्नपानमनुत्तमम्।
ब्राह्मे मुहूर्ते चोत्थाय ध्यायेद्देवमधोक्षजम्॥ 9 ॥

अतिसुविमलगात्रं रुक्मपात्रस्थमन्नं
    सुललितदधिखण्डं पाणिना दक्षिणेन।
कलशममृतपूर्णं वामहस्ते दधानं
    तरति सकलदुःखाद्वामनं भावयेद्यः॥ **10** ॥

क्षीरमन्नमन्नदाता लभेदन्नाद एव च।
पुरस्तादन्नमाप्नोति पुनरावर्तिवर्जितम्।
आयुरारोग्यमैश्वर्यं लभते चान्नसम्पदः॥ **11** ॥

इदं स्तोत्रं पठेद्यस्तु प्रातःकाले द्विजोत्तमः।
अक्लेशादन्नसिद्ध्यर्थं ज्ञानसिद्ध्यर्थमेव च॥ **12** ॥

अभ्रश्यामः शुभ्रयज्ञोपवीती
    सत्कौपीनः पीतकृष्णाजिनश्रीः।
छत्री दण्डी पुण्डरीकायताक्षः
    पायाद्देवो वामनो ब्रह्मचारी॥ **13** ॥

अजिनदण्डकमण्डलु मेखला -
    रुचिरपावनवामनमूर्तये।
मितजगत्त्रितयाय जितारये
    निगमवाक्पटवे वटवे नमः॥ **14** ॥

श्रीभूमिसहितं दिव्यं मुक्तामणिविभूषितम्।
नमामि वामनं विष्णुं भुक्तिमुक्तिफलप्रदम्॥ **15** ॥

वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्मृतः।
वामनस्तारकोभाभ्यां वामनाय नमो नमः॥ **16** ॥

॥ इति श्री दधिवामनस्तोत्रं समाप्तम्॥